## कुत्सिते । (७४/२०२९)

[1]कुत्सितो गर्हितो, निन्दितः । प्रकृत्यर्थविशेषणं चैतत् । कुत्सितत्वोपाधिकेऽर्थे वर्तमानात् [2]प्रातिपदिकात् स्वार्थे यथाविहितं प्रत्ययो भवति । कुत्सितोऽश्वः अश्वकः । उष्ट्रकः । गर्दभकः । उच्चकैः । नीचकैः । सर्वके । विश्वके । पचतकि । जल्पतकि ॥

## सञ्ज्ञायां कन् । (७५/२०३०)

कुत्सिते इत्येव । [3]कुत्सितत्वोपाधिकेऽर्थे वर्तमानात् प्रातिपदिकात् कन्प्रत्ययो भवति, कस्यापवादः, [4]प्रत्ययान्तेन चेत् सञ्ज्ञा गम्यते । शूद्रकः । [5]धारकः । [6]पूर्णकः[7] ॥

## अनुकम्पायाम् । (७६/२०३१)

कारुण्येनाभ्युपपत्तिः परस्य अनुकम्पा । तस्यां गम्यमानायां [8]सुबन्तात् तिङन्ताच्च यथाविहितं प्रत्ययो भवति । पुत्रकः । वत्सकः । दुर्बलकः । [9]बुभुक्षितकः । स्वपितकि । [10]श्वसितकि[11] ॥

## नीतौ च तद्युक्तात् । (७७/२०३२)

सामदानादिरुपायो नीतिः । नीतौ च गम्यमानायां तद्युक्तादनुकम्पायुक्ताद् [12]यथाविहितं प्रत्ययो भवति । हन्त ते धानकाः[13] । हन्त ते तिलकाः[14] । एहकि । अद्धकि । [15]परस्यानुकम्पामात्रोपादानेनाराधयति । पूर्वेण प्रत्यासन्नानुकम्पासम्बन्धात् अनुकम्प्यमानादेव [16]प्रत्ययो [17]विहितः । संप्रति व्यवहितादपि यथा स्यादिति वचनम् ॥

## बह्वचो मनुष्यनाम्नष्ठज्वा । (७८/२०३३)

'अनुकम्पायाम्' (५. ३. ७६/२०३१), 'नीतौ च तद्युक्तात्' (५. ३. ७७/२०३२) इति वर्तते । बह्वचः प्रातिपदिकात् मनुष्यनामधेयाद् वा ठच् प्रत्ययो भवति, अनुकम्पायां गम्यमानायां [18]नीतौ च । देविकः, देवदत्तकः । [19]यज्ञिकः, यज्ञदत्तकः । बह्वचः इति किम् ? दत्तकः । गुप्तकः । मनुष्यनाम्नः इति किम् ? [20]भद्रबाहुकः । [21]भद्रबाहुकः ॥

---

1. कुत्सितं गर्हितं निन्दितम् ब. ड. क. ह. 2. ङ्याप्प्रातिपदिकात् तिङन्ताच्च क. ड. 3. कुत्सि-ततोपाधिके फ. 4. तदन्तेन क. 5. साधकः ड. ह, राजकः ब.फ, बाधकः क. 6. चूर्णकः ड. 7. स्वार्थं वचनम् इत्यधिकम् क. ड. 8. प्रातिपदिकात् इत्यधिकम् क. 9. जल्पतकिः ड. फ. 10. नास्ति क. फ, ज्वरित क. ड. ह. 11. ज्वरितकिः इत्यधिकम् फ. 12. सुबन्तात् तिङन्ताच्च इत्यधिकम् क. 13. हन्त ते गुडकाः इत्यधिकम् ड. ह, हन्तते वालकः, हन्त ते गवकः, हन्त ते वस्त्रकम्, हन्त तेऽश्वकाः इत्यधिकम् क. 14. धानकि, अर्धकि [इत्यधिकम् [ग. ह, एककि इत्यधिकम् क. 15. अनुकम्पमानो दानेन ब.ड.ह. 16. एतत्प्रत्ययो ग. 17. भवति क. 18. नीतौ नास्ति फ. 19. यज्ञिकः नास्ति फ. 20. भद्रबाहुकः नास्ति फ, भद्रकाः क. 21. भद्रबाहुः ह, बाहुकाः क.